# ॥देवी अथर्वशीर्ष ॥

ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवीति ॥१ ॥

साब्रवीत् अहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् ।शून्यं चाशून्यं च ॥२ ॥

अहमानन्दानानन्दौ । अहम्विज्ञानाविज्ञाने । अहं ब्रह्माब्रह्मणी वेदितव्ये ।

अहंपञ्चभूतान्यपञ्चभूतानि । अहम्अखिलं जगत ॥३ ॥

वेदोऽहमवेदोऽहम् । विद्याहम् अविद्याहम् । अजाहमनजाहम् । अधश्चोर्ध्वं च तिर्यक्चाहम् ॥४ ॥

अहं रुद्रेभिर्वसुभिश्चरामि । अहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणाउभौ बिभर्मि । अहम् इंद्राग्नी अहम् अश्विनाउभौ ॥५ ॥

अहं सोमं त्वष्टारं पूषणं भगं दधामि । अहं विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि ॥६ ॥

अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते । अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् । अहं सुवे पितरमस्य मूर्द्धन्मम योनिरप्स्वंतः समुद्रे । य एवं वेद । स दैवीं सम्पदमाप्नोति ॥७ ॥

ते देवा अब्रुवन्--नमो देव्यै महादेव्यै शिवायै सततं नमः । नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥८ ॥

तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः ॥९ ॥

देवीं वाचमजनयन्त देवास्तां विश्वरुपाः पशवो वदन्ति । सा नो मंद्रेषमूर्जं दूहाना धेनुवारस्मानुप सुष्टुतैतु ॥१० ॥

कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरं । सरस्वतीमदितिं दक्षदुहितरं नमामः पावना

शिवाम् ॥११ ॥

महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि । तन्नो देवी प्रचोदयात् ॥१२ ॥

अदितिर्ह्यजनिष्ट दक्ष या तव । तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥१३ ॥

कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः । पुनर्गुहा सकला मायया च पुरुच्यैषा विश्वमातादिविद्योम् ॥१४ ॥

एषाऽऽत्मशक्तिः । एषा विश्वमोहिनी । पाशाङ्कुशधनुर्बाणधरा । एषा श्रीमहाविद्या । य एवं वेद स शोकं तरति ॥१५ ॥

नमस्ते अस्तु भगवति मातरस्मान् पाहि सर्वतः ॥१६ ॥

सैषाष्टौ वसवः । सैषैकादश रुद्राः । सैषा द्वादशादित्याः । सैषा विश्वेदेवाः सोमपा असोमपाश्च । सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षाः सिद्धाः । सैषा सत्वरजत्समांसि । सैषा ब्रह्मविष्णुरुद्ररुपिणि । सैषा प्रजापतीन्द्रमनवः । सैषा ग्रहनक्षत्रज्योतिंषि । कलाकाष्ठादिकालरुपिणी । तामहं प्रणौमि नित्यम् ॥ पापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीम् । अनंतां विजयां शुद्धां शरण्यां शिवदां शिवाम् ॥१७ ॥

वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम् । अर्धेंदुलसितं देव्या बीजं सर्वार्थसाधकम् ॥१८ ॥

एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः । ध्यायन्ति परमान्दमया ज्ञानाम्बुराशयः ॥१९ ॥

वाङ्माया ब्रह्मसूस्तस्मात् शष्ठं वक्त्रसमन्वितम् । सूर्योऽवामश्रोत्रबिंदुसंयुक्तष्टात्तृतीयकः । नारायणेन संमिश्रो वायुश्चाधरयुक् ततः । विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः ॥२० ॥

हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् ।पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् ।त्रिनेत्रां रक्तवसनां भक्तकामदुधां भजे ॥२१ ॥

नमामि त्वां महादेवीं महाभयविनाशिनीम् । महादुर्गप्रशमनीं महाकारुण्यरूपिणीम् ॥२२ ॥

यस्याः स्वरुपं ब्रह्मादयो न् जानन्ति तस्मादुच्यते अज्ञेया। यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता। यस्या लक्ष्यं नोपलक्ष्यते तस्मादुच्यते अलक्ष्या। यस्या जननं नोपलभ्यते तस्मादुच्यते अजा। एकैव सर्वत्र वर्तते तस्मादुच्यते एका। एकैव विश्वरूपिणी तस्मादुच्यते नैका। अत एवोच्यते अज्ञेयानन्तालक्ष्याजैका नैकेति॥२३॥

मंत्राणां मातृका देवी शब्दानां ज्ञानरुपिणी। ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी। यस्याः परतरं नास्ति सैषा दुर्गा प्रकिर्तिता॥२४॥

तां दुर्गांदुर्गमां देवीं दुराचारविघातिनीम्। नमामि भवभीतोऽहं संसारार्णवतारिणीम्॥२५॥

इदम् अथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षजपफलमाप्नोति। इदम् अथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति शतलक्षं प्रजप्त्वापि सोऽर्चासिद्धिं न विन्दति। शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः। दशवारं पठेद्यस्तु सद्यः पापैःप्रमुच्यते। महादुर्गाणि तरति महादेव्याः प्रसादतः॥२६॥

सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रीकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो अपापो भवति। निशीथे तुरीय संध्याया जप्त्वा वाक्सिध्दीर्भवति। नूतनायां प्रतिमायां जप्त्वा देवतासांनिध्यं भवति। प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति। भौमाश्विन्यां महादेवीसंन्निधौ जप्त्वा महामृत्युं तरति। स महामृत्युं तरति य एवं वेद। इत्युपनिषत्॥२७॥